उत्तरतः, [स्] व्य, (उत्तर + स्वार्थे + अतसुच् ।) उत्तरदिग्देशकालात् । इति रायमुकुटः ॥ उत्तर हइते इति भाषा । (यथा, रामायणे ४ । ५५ । अध्याये ।

"दक्षिणाग्रेषु दर्भेषु स्नात्वा चोत्तरतः शिरः ।
तमेवानुसरिष्यन्तः सर्व्वे संविविशुर्भुवि" ॥)

उत्तरतारं, क्ली, (उत्तरमपरं तारं ।) उत्तरतीरम् । इति सिद्धान्तकौमुदी ॥

उत्तरपक्षः पुं, (उत्तरः पक्षः ।) विचारसिद्धान्तः । समाधानम् । तत्पर्य्यायः । सिद्धान्तः२ समाधिः३ कृतान्तः ४ । इति त्रिकाण्डशेषः ॥ सिद्धान्तानुकूलतर्कोपन्यासः । इति स्मृतिः ॥ यथा माघे ।
("प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्" ।२।१५ ॥)

उत्तरपादः, पुं, (उत्तरः पादः ।) चतुष्पाद्व्यवहारान्तर्गतद्वितीयपादः । (यथाह बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः" ।)
उत्तरम् । इति व्यवहारतत्त्वम् ॥

उत्तरफल्गुनी, स्त्री, (उत्तरा फल्गुनी ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वादशनक्षत्रम् । अस्या रूपम् । दक्षिणोत्तरमिलिततारकाद्वयम् । इति कालिदासः ॥ पर्य्यङ्करूपं तारकाद्वयं । इति दीपिकाटीका ॥ अस्या अधिष्ठात्री देवता अर्य्यमा । अस्या मिश्रगुणः । अस्यां जातफलम् ।

"दाता दयालुः स्वजने सुशीलो
विशालकीर्त्तिः सुमतिः प्रधानः ।
धीरो नरोऽत्यन्तमृदुस्वभाव-
श्चदुत्तराफल्गुनिकाप्रसूतिः" ॥

इति कोष्ठीप्रदीपः ॥

उत्तरफाल्गुनी, स्त्री, (उत्तरा फाल्गुनी ।) उत्तरफल्गुनीनक्षत्रम् । तत्पर्य्यायः । उत्तरा २ अर्य्यमदेवा ३ । इति हेमचन्द्रः ॥

उत्तरभाद्रपत्, [द्] स्त्री, (उत्तरा भाद्रपत् ।) उत्तरभाद्रपदानक्षत्रम् । इति ज्योतिषम् ॥

उत्तरभाद्रपदा, स्त्री, (उत्तरा भाद्रपदा ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषड्विंशनक्षत्रं । तत्पर्य्यायः । प्रौष्ठपदा २ अहिर्ब्रध्नदेवता ३ । इति हेमचन्द्रः ॥ अस्या रूपम् ।

"उत्तरे सुमुखि तारमूर्त्तिभि-
स्त्वत्तमाङ्कमिलितद्वितारके ।
नीलचामरकचे न्वयुग्मतो
लोचनाञ्चलकलाः पलायिताः" ॥

इति कालिदासः ॥ पर्य्यङ्करूपमष्टतारात्मकं । इति दीपिकाटीका ॥ अस्यां जातफलम् ।

"धनी कुलीनः कुशलः क्रियादौ
भूपाश्रमान्यो बलवान् महौजाः ।
सत्कर्म्मकर्त्ता निजबन्धुभक्तो
यद्युत्तराभाद्रपदाप्रसूतः" ॥

इति कोष्ठीप्रदीपः ॥

उत्तरवादी, [न्] त्रि, (उत्तरं वदति यः । उत्तर + वद + णिन् ।) उत्तरवक्ता । इति व्यवहारतत्त्वम् ॥ आसामी इति भाषा । यथा याज्ञवल्क्यः २ । १७ ।
("पूर्व्वपक्षेऽधरीभूते भवत्युत्तरवादिनः" ॥)

उत्तरसाक्षी, [न्] त्रि, स्वपक्षसम्बन्धिसाक्ष्यं परिभाषितं साक्षिणां यः स्वयं शृणोति अर्थिना आहूते वा सः । तथाच नारदः ।

"साक्षिणामपि यः साक्ष्यं स्वपक्षे परिभाषताम् ।
श्रवणात् श्रावणाद्वापि स साक्ष्युत्तरसंज्ञकः" ॥

इति व्यवहारतत्त्वम् । परसाक्षी इति भाषा ॥

उत्तरसाधकः त्रिं, (उत्तरः साधकः ।) साधकसहायः । सहकारी ॥

उत्तरा, स्त्री, (उत्तर + टाप् ।) विराटराजकन्या । साभिमन्युपत्नी । इति मेदिनी ॥ (यथा महाभारते ३ । गोहरणपर्व्वणि ३५ । २३ ।

"स तत्र नर्म्मसंयुक्तमकरोत् पाण्डवो बहु ।
उत्तरायाः प्रमुखतः सर्व्वं जानन्नरिन्दमः" ॥)

उत्तरा दिक् । तत्पर्य्यायः । कौवेरी २ देवी ३ उदीची ४ । इति राजनिर्घण्टः ॥ (यथा महाभारते २ । दिग्विजयपर्व्वणि २८ । १७ ।
"एवं स पुरुषव्याघ्रो विजिग्ये दिशमुत्तराम्" ।)
अस्या दिशोऽधिपतिः कुवेरः कर्कटवृश्चिकमीनराशयश्च । यथा । समयप्रदीपः ॥

"मेषसिंहधनुः प्राच्यां दक्षिणस्यान्तु तत्परे ।
प्रतीच्यां तत्परे ज्ञेया उदीच्याञ्च ततः परे" ॥

उत्तरात्, व्य, (उत्तराधरदक्षिणादातिः इति उत्तरादातिप्रत्ययः ।) उत्तरा दिक् । इत्यमरटीकायां रायमुकुटः ॥ (यथा, ऋग्वेदे ६।१९।९ ।
"आ ते शुष्मो वृष्ण एतु पश्चादोत्तरादधरादापुरस्तात्" ॥)

उत्तराधिकारी, [न्] त्रि, (उत्तरं पूर्व्वस्वामिकस्वत्वनाशानन्तरं अधिकरोति पूर्व्वस्वामिकधने स्वाम्यमाप्नोतीति । उत्तर + अधि + कृ + णिन् ।) प्रथमाधिकारिणः पश्चादधिकारी । दायादः । ओयारिस् इति यावनी भाषा ॥ (स्वत्वधनोत्तराधिकारिणो दायभागशब्दे द्रष्टव्याः ॥)

उत्तराभासः, पुं, (सदुत्तरम् इव आभासते । आङ् + भास + अच् ।) दुष्टोत्तरम् । तथा च कात्यायनः ।

"प्रकृतेन त्वसम्बन्धमत्यल्पमतिभूरि च ।
पक्षैकदेशव्याप्येव तत्र नैवोत्तरं भवेत्" ॥

इति व्यवहारतत्त्वम् ॥

उत्तरायणं, क्ली, (उत्तरा उत्तरस्यां अयनं सूर्य्यादेर्गमनम् । पूर्व्वपदात्संज्ञायामिति णत्वम् ।) सूर्य्यस्य उत्तरदिग्गमनकालः । स तु माघादिषण्मासात्मकः । इति हेमचन्द्रः ॥ (यथाह सूर्य्यसिद्धान्तः ।

"भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम् ।
कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्" ॥
"माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादितः ।
उत्तरायणमाद्यैस्त्रिभिः स्याद्दक्षिणायनम्" ।)

देवानां दिनम् । इति स्मृतिः ॥ (मकरसंक्रान्तिः ।
"वानप्रस्थाश्रमिभिर्विप्रैः करणीयो यागभेदः" ।
यदुक्तं मनुना ६।१० ।

"ऋक्षेष्ट्याग्रयणञ्चैव चातुर्मास्यानि चाहरेत् ।
उत्तरायणञ्च क्रमशो दाक्षस्यायनमेव च" ॥
"शिशिरश्च वसन्तोऽपि ग्रीष्मः स्यादुत्तरायणे" ।

इति हारीते प्रथमस्थाने चतुर्थोऽध्यायः ॥

"शिशिराद्यास्त्रिभिस्तैस्तु विद्यादयनमुत्तरम् ।
आदानञ्च तदा दत्ते नृणां प्रतिदिनं बलम् ॥
तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षामार्गस्वभावतः ।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥
तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात् ।
तस्मादादानमाग्नेयम्" । इति सूत्रस्थाने तृतीयेऽध्याये वाभटेनोक्तं ॥

"तत्र ते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च" ।
"उत्तरञ्च शिशिरवसन्तग्रीष्मास्तेषु भगवानाप्यायतेऽर्कस्तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपहीयते" ॥
इति सूत्रस्थाने षष्ठेऽध्याये सुश्रुतेनोक्तम् ॥)

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा ।) उत्तराषाढ़ानक्षत्रम् । इति भरतो द्विरूपकोषश्च ॥

उत्तराशापतिः,पुं, (उत्तराशायाः उत्तरदिशः अधिपतिः अधिष्ठाता ।) कुवेरः । इति हलायुधः ॥

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकविंशनक्षत्रम् । अस्या रूपम् । शूर्पाकृतितारचतुष्टयात्मकम् । अस्या अधिदेवता विश्वः । इति कालिदासः ॥ गजदन्तवद्दन्ततारामयम् । इति दीपिकाटीका ॥
तत्र जातफलम् । यथा कोष्ठीप्रदीपे ।

"दाता दयावान् विजयी विनीतः
सत्कर्म्मचेता विभवैः समेतः ।
कान्तासुतावाप्तसुखो नितान्तं
विश्वे सुवेशः पुरुषो मनीषी" ॥)

उत्तरासङ्गः, पुं, (उत्तरे ऊर्द्धभागे आसज्यते । उत्तर + आ + सञ्ज + घञ् ।) उत्तरीयवस्त्रं । इत्यमरः ॥

("कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्" ।

इति कुमारे ५।१६ ॥ तथा, रामायणे २।५०।४८ ।
"ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्" ॥)

उत्तरीयं, क्ली, (उत्तरस्मिन् ऊर्द्ध्वदेहभागे भवम् । उत्तर + छ ।) उत्तरीयवस्त्रम् । दोवोट् दोञा इत्यादि भाषा । तत्पर्य्यायः । प्रावारः २ उत्तरासङ्गः ३ वृहतिका ४ संव्यानम् ५ । इत्यमरः ॥ कक्षा ६ । इति जटाधरः ।

("अथास्य रत्नग्रथितोत्तरीय-
मेकान्तपाण्डुस्तनलम्बिहारम्" ।

इति रघुः १६।४३ । यथा रामायणे २ ८८।१४ ।
"उत्तरीयमिवासक्तं सुव्यक्तं सीतया तदा" ॥)

उत्तरेण, व्य, (उत्तर + एनप् ।) उत्तरदिग्देशकालः । इत्यमरटीकायां रायमुकुटः ॥ यथा मेघदूते १६।७५ ।
("किञ्चित्पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण" ।
"तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्" ॥)

उत्तरेद्युः, [स्] व्य, (उत्तरस्मिन्नहनि इत्यर्थे सद्यःपरुदिति उत्तरशब्दादेद्युस् प्रत्ययो निपातितः ।) उत्तरस्मिन्नहनि । आगामिदिने । इति शब्दरत्नावली ॥

उत्तानं, त्रि, (उद्गतस्तानो विस्तारो यस्मात् ।) अगभीरम् । ऊर्द्ध्वमुखशयितम् । इति मेदिनी ॥ चित्